दिनाङ्क :-30.10.2024 प्रात: - 06:55

**इयम् आकाशवाणी**

**अथ वार्ताः**

**प्रधानमन्त्री – गुजरातयात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य गुजरातराज्यस्य द्विदिवसीययात्रायां भविष्यति। तत्रासौ आधारभूत-संरचनानां परियोजनानाञ्च शिलान्यासम् उद्घाटनं च करिष्यति। अद्य सायंकाले एकतानगरे अशीत्यधिक-द्विशत-कोटिरुप्यकाणां विकासपरियोजनानाम् उद्घाटनं विधास्यते। परियोजनानाम् उद्देश्यं पर्यटनस्य संवर्धनं संशोधनम् च इति वर्तते। श्रीमोदी अत्रावसरे आरम्भ इत्याख्यस्य षष्ठमसंस्करणस्य नवनवतितमस्य कॉमन-फाउण्डेशन-कोर्स-इत्येतस्य अधिकारिप्रशिक्षून् सम्बोधयिष्यति। एतस्मिन् आरम्भ नामामिधेयके भारतस्य षोडश प्राशासनिक-सेवानां भूटानदेशस्य च तिसृणां प्राशासनिकसेवानां त्रिपञ्चादशधिक-षड्शतम् अधिकारि-प्रशिक्षव: सम्मिलिता: सन्ति।

**प्रधानमन्त्री-धनवन्तरी-जयन्ती**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्य: धनवन्तरीजयन्त्याः नवमस्य आयुर्वेददिवसस्य च अवसरे नवदिल्ल्यां प्रायश: पञ्चाशदधिक-अष्टशतोत्तर-द्वादशसहस्र-कोटिरूप्यकाणां स्वास्थ्यक्षेत्रसम्बद्धानां बहुविधप्रकल्पानाम् उद्घाटनम्, शिलान्यासः च कृतः। प्रधानमन्त्री आयुष्मान्-भारत-प्रधानमन्त्री-जन-आरोग्य-योजनायाः प्रमुख-योजनायाः रूपेण सप्तति वर्षतः अधिकवयस्कानां सर्वेषां वरिष्ठनागरिकाणां कृते स्वास्थ्य-व्याप्ति-विस्तारम् अपि प्रारब्धवान्। एतेन सर्वेषां वरिष्ठनागरिकाणाम् आयस्य विचारं विना स्वास्थ्य-रक्षणं प्रदातुं साहाय्यं मेलिष्यति। भारतस्य प्रथमस्य अखिलभारतीय-आयुर्वेद-संस्थानस्य द्वितीय-चरणस्य उद्घाटनम् अपि श्रीमोदी अकरोत्।

**प्रधानमन्त्री-नियुक्तिपत्राणि**

प्रधानमन्त्री ह्य: विभिन्नेषु प्राशासनिक-विभागेषु सङ्घटनेषु च नव-नियुक्तेभ्य: युवभ्य: एकपञ्चाशत्सहस्राधिकं नियुक्तिपत्राणि समर्पितवान्। प्रधानमन्त्री श्रीमोदी प्रोक्तवान् यत् प्रशासनेन आत्मनिर्भर-भारतस्य दिशि अनेकानि महत्वपूर्णं कार्याणि विहितानि। अन्तरिक्षं समेत्य विद्युत्वाहनं यावत् सर्वेषु प्रौद्योगिक-सम्बद्धेषु क्षेत्रेषु मेक इन इण्डिया इति उपक्रम: अपि वर्धित:। श्रीमोदिना अग्रे प्रोक्तं यत् भारतं विश्वस्य तृतीया वर्धमाना अर्थव्यवस्था भविष्यति। अन्तर्जालीयमाध्यमेन आयोजितं समारोहं सम्बोधयन् असौ प्रावोचत् यत् प्रशासनं युवभ्य: अधिकाधिकं वृत्यवसरान् प्रदातुं प्रतिबद्धं वर्तते।

**अयोध्या-दीपोत्सव:**

भगवत: श्रीरामस्य नगर्याम् अयोध्यायां दीपोत्सव: महदुत्साहेन आचरिष्यते। आशास्यते यत् अयं दीपोत्सव: भव्यं भविष्यति यतोहि उत्तरप्रदेश-प्रशासनेन सरयूनद्या: तटे अष्टाविंशति-लक्षं यावत-दीपान् प्रज्वाल्य नवीनं कीर्तिमानं निमास्यते। सम्पूर्णा नगरी दीपोत्सवाय उत्सुका उत्साहिता चास्ति। अपि च अस्मै आयोजनाय अयोध्यानगरी सर्वविधप्रकारेण सज्जास्ति।

**झारखण्ड-विधानसभा**

महाराष्ट्रराज्ये एकलचरणीय-मतदानाय अपि च झारखण्ड-राज्ये द्वितीयचरणाय विधानसभा-निर्वाचनाय ह्य: नामाङ्कन-पूरणप्रक्रिया सम्पन्ना। एतयो: द्वयो: राज्ययो: नामांकनपत्राणां निरीक्षणकार्यं अद्य भविष्यति। प्रत्याशिन: नवम्बर-मासस्य प्रथम-दिनांक-पर्यन्तं स्वीय-नामाङ्कन-प्रत्यावर्तनं कर्तुं शक्नुवन्ति। महाराष्ट्रस्य अष्टाशीत्यधिक-द्विशतं विधानसभाक्षेत्रेभ्य: तथा च झारखण्डस्य द्वितीयचरणस्य अष्टात्रिंशत्-विधानसभासनेभ्य: मतदानम् आगामिमासस्य विंशति-दिनाङ्के भविष्यति। झारखण्ड-महाराष्ट्र-राज्ययो: विधानसभा-निर्वाचनस्य मतगणना नवम्बर-मासस्य त्रयोविंशति दिनाङ्के भविष्यति।

**इजराइलदेश: प्रतिबन्ध:**

इजराइलदेशस्य संसदा नेसेट इत्यनेन इजराइलदेशे फिलिस्तीनदेशस्य शरणार्थिभ्य: संयुक्तराष्ट्रस्य साहाय्योद्धारकार्यं कर्तुं प्रतिबन्ध: कृत:।

**क्रिकेट्- प्रतिस्पर्धा**

महिलानाम् एकदिवसीय-क्रिकेटप्रतिस्पर्धायां अहमदाबादनगरे भारतेन न्यूजीलैण्डदलम् अष्टस्तोभै: पराजितम्। एतेन साकमेव तिसृणां प्रतिस्पर्धानां श्रृङ्खला द्वे-शून्यम् इत्यनेन अङ्केन विजिता।

**।।इति वार्ता:।।**